विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:-२७/०७/२०२० (एन.सी.ई.आर.टी.पर आधारित प्रश्न)

अधोलिखितगद्यांशौ पठित्वा प्रश्नानां उत्तराणि लिखत –

# पुरा कश्मिंश्चित् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याश्चैका दुहिता विनम्रता मनोहरा चासीत्।

एकला माता स्थाल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश-'सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।'किञ्चित्कालादनन्तरम् एको विचित्रो काको समुड्डीय तामुपाजगाम।

(१)एकदेन उत्तरत-

(क)वृद्धाया:दुहिता कीदृशी आसीत्?(ख)वृद्धा स्त्री कुत्र अवसत् ?

(२) पूर्णवाक्येन उत्तरत –(क) वृद्धामाता पुत्रीम् किमादिदेश ?

(३)भाषिककार्यम् – (क)’आदिदेश'इति क्रियापदस्य कर्तृपदं किं अस्ति?(ख)'मनोहरा' इति पदस्य विशेष्यपदम् किं अस्ति?(ग)काक:'इति पदस्य विशेषणपदम् किं अस्ति?(घ)’दुहिता'इति अर्थे गद्यांशे किं अन्यपदम् प्रयुक्तम्?

# नैतादृश: स्वर्णपक्षो रजतचञ्चु: स्वर्णकाकस्तया पूर्वं दृष्ट:।तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा।तं निवारयन्ती सा प्रार्थयत्- 'तण्डुलान् मां भक्षय।मदीया माता अतीव निर्धना वर्तते।‘

स्वर्णपक्ष: काक:, प्रोवाच-'मा शुच:।‘

(१) एकपदेन उत्तरत-(क)का रोदितुमारब्धा?(ख)का प्रार्थयत्-'तण्डुलान् मा भक्षय।‘,

(२) पूर्णवाक्येन उत्तरत –(क)कम् निवारयन्ती प्रार्थयत्-'तण्डुलान् मा भक्षय।‘

(३)भाषिककार्यम् –
(क)'रोदितुमारब्धा'इति क्रियापदस्य कर्तृपदम् किं अस्ति? (ख)'मदीयामाता'अत्र विशेष्यपदं किं अस्ति?
(ग)'तंनिवारयन्ती'अत्र‘तं'इति सर्वनामपदम् कस्मै प्रयुक्तम्?(घ)’हसितुम्'इति पदस्य विपर्ययपदम् किं अस्ति?